युक्तो साक्षिणि। साक्षिणोदोषाश्च नारदेनोक्ताः यथा "यस्त्वात्मदोषदुष्टत्वादस्वस्थ इव लक्ष्यते। स्थानात् स्थानान्तरं गच्छेदेकैकञ्चानुधावति। कासत्यकस्माच्च भृशमभीक्ष्णं निःश्वसित्यपि। विलिखत्यवनीं पद्भ्यां बाहू वासश्च धूनयेत्। भिद्यते मुखवर्णोऽस्य ललाटं स्विद्यते तथा। शोषमागच्छतश्चोष्ठावूर्द्ध्वं तिर्य्यक् च वीक्षते। त्वरमाण इवाबद्धमपृष्टो बहु भाषते। कूटसाक्षी स विज्ञेयस्तं पापं विनयेद्भृशम्"। अबद्धमसम्बद्धम्। विनयेच्छिक्षयेद् यथा कौटसाक्ष्याद्बिभेतीत्यर्थः। न तु दण्डयेदित्यर्थः। प्राकृतवैकृतिकविकारविवेकस्य दुःशक्यत्वात् सम्भावनामात्रेण च दण्डनस्यान्याय्यत्वादिति मिता० उक्तम्। मदनरत्ने त्वाविद्धमिति पठित्वा आकुलमिति व्याख्यातम्। शङ्खलिखितावपि "मन्त्रिभिः शास्त्रसामर्थ्याद्दुष्टलक्षणं शास्त्रान्निर्यक्प्रेक्षते समन्तादेवावलोकयति। अकस्मान्मूत्रं पुरीषं विसृजति देशाद्देशं गच्छति पाणिना पाणिं पीडयति नखान्निकृन्तति मुखमस्य विवर्णतामेति प्रस्विद्यति चास्य ललाटञ्च चक्षुर्न च वाचं प्रतिपूजयत्यकस्माद्ददाति, प्रशंसति पुनः पुनरन्यमपवदति बहिर्निरीक्षते शस्त्रं परामृशति शिरः प्रकम्पयत्योष्ठौ निर्भुजति सृक्कणी परिलेढि अतिविस्मितः कर्मस्वमहत्स्वपि भ्रुवौ संहरति तूष्णीं ध्यायति पूर्वोत्तरविरुद्धं व्याहरति एवमादिदुष्टलक्षणं क्रुद्धस्य च स्वामिनोऽन्यत्र प्रकृतिशीलादिति" अकस्मादिति तूष्णीमिति च यथायोगमनेकत्र सम्बन्धनीयम्। अन्यत्र प्रकृतिशीलादिति। प्रकृत्या स्वभावात् शीलान्निर्यक्प्रेक्षणादिधर्मो यस्य स तथोक्तस्ततोऽन्यत्रैतानि दुष्टक्रुद्धलक्षणानि, एते अवान्तरवैलक्षण्यस्य दुर्ज्ञेयत्वादित्यवधानेन परीक्ष्य वस्तुतत्त्वानुसरणङ्करणीयमिति सूचितम्" वीरमि०

मुनिवाक्ये अन्येऽपि साक्षिदोषा असाक्षिलक्षणोक्त्या वीरमि० भङ्ग्यादर्शिता यथा

मनुः "नार्थसम्बन्धिनो नाप्ता न सहाया न वैरिणः। न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः। न साक्षी नृपतिः कार्य्यो न कारुककुशीलवौ। न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः। नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्म्मकृत्। न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः। नार्त्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः। न श्रमार्त्तो न कामार्त्तो न क्रुद्धो नापि तस्करः" इति। "अत्र सर्व्वैर्विशेषणैरसत्यसम्भावना विस्मरणादिकमसाक्ष्यनिमित्तमुपलक्ष्यते। अतएव वृद्धविकलेन्द्रियविकर्म्मकृत्तस्करादीनां गोवृषन्यायेन पुनरुपादानम्। अत्र बहवः शब्दाः स्पष्टार्थाः। अन्ये मेधातिथ्यनुसारेण विव्रियन्ते। अर्थसम्बन्धिन उत्तमर्णाधमर्णाद्याः उत्तमर्णोह्यधमर्णवचनेन पराजीयमानस्तदानीमेव रोषाविष्टोऽधमर्णाद्दत्तं प्रत्यादातुं प्रयतेतेति तच्चित्तानुवृत्तिरधमर्णस्य तदनुगुणकौटसाक्ष्यहेतुत्वेन सम्भाव्यते। उत्तमर्णो निर्धनेऽधमर्णे स्वसाक्षितया धनं प्राप्य स्वस्मै तदर्पयिष्यतीति बुद्ध्या तदनुगुणवादी सम्भाव्यते। तथार्थः प्रयोजनन्तत्सम्बन्धिनोर्वादिप्रतिवादिनोरन्यतरस्माद् येषां स्वप्रयोजनं सिसाधयिषितन्तेऽप्युपकारगन्धाच्च साक्ष्यार्हा इत्यादि। सर्व्वत्र कौटसाक्ष्यसम्भावनोन्नेया। दृष्टदोषा अन्यत्र कृतकौटसाक्ष्याः। व्याध्यार्त्ता वचनविसंवादापादकव्याधिपीड़ावन्तः। दूषिता अभिशस्ताः। नृपतेरसाक्षित्वमकृताभिप्रायेणातो न प्राक्तननारदोक्तिविरोधः। लिङ्गस्थोऽपत्यादिः। सङ्गेभ्यो विनिर्गतः परित्यक्तः पित्रादिगुरुजनसंसर्गात् वृद्धानुपसेवनादस्याऽसत्यसम्भावना। अध्यधीनो बन्धकीकृतः तस्य तदाज्ञावशवर्त्तित्वात्। वक्तव्यो निन्दास्पदम् विकर्म्मकृत् अधर्म्मभीरुः। वृद्धविकलेन्द्रिययोर्वार्द्धकस्वभावहेतुकेन्द्रियवैकल्येन भेदः। आर्त्तः शोकेन। नारदोऽपि "दासनैष्कृतिकाश्रद्धवृद्धस्त्रीबालचाक्रिकाः। मत्तोन्मत्तप्रमत्तार्त्तकितवग्रामयाजकाः। महापथिकसामुद्रवणिक्प्रव्रजितातुराः। व्यङ्गैकश्रोत्रियाचारहीनक्लीबकुशीलवाः। नास्तिकव्रात्यदाराग्नित्यागिनोऽयाज्ययाजकाः। एकस्थालीसहायारिचरज्ञातिसनाभयः। प्राग्दृष्टदोषशैलूषविषजीव्यहितुण्डिकाः। गरदाग्निदकीनाशशूद्रापुत्त्रोपपातिनः। क्लान्तसाहसिकश्रान्तनिर्धूतान्त्यवसायिनः। भिन्नवृत्तासमावृत्तजडतैलिकमूलिकाः। भूताविष्टनृपद्विष्टवर्षनक्षत्रसूचकाः। अघशंस्यात्मविक्रेतृहीनाङ्गभगवृत्तयः। कुनखी श्यावदन् श्वित्री मित्रध्रुक्शठशौण्डिकाः। ऐन्द्रजालिकलुब्धोग्रश्रेणीगणविरोधिनः। वधकृच्चित्रकृत् शङ्खी पतितः कूटकारकः। कुहकः प्रत्यवसितस्तस्करो राजपूरुषः। मनुष्यपशुमांसास्थिमधुक्षीराम्बुसर्पिषाम्। विक्रेता ब्राह्मणश्चैव द्विजो वार्द्धुषिकश्च यः। च्युतः स्वधर्मात् कुलिकः सूचको हीनसेवकः। पित्रा विवदमानश्च भेदकृच्चेत्यसाक्षिणः। श्रेण्यादिषु तु वर्गेषु कश्चिच्चेद्द्वेष्यतामियात्। तस्य तेभ्यो न साक्ष्यं